॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय १९

सारणस्य वचः श्रुत्वा रावणं राक्षसाधिपम् ।
बलमालोकयन्सर्वं शुको वाक्यमथाब्रवीत् ॥१॥

स्थितान्पश्यसि यानेतान्मत्तानिव महाद्विपान् ।
न्यग्रोधानिव गाङ्गेयान्सालान्हैमवतीनिव ॥२॥

एते दुष्प्रसहा राजन्बलिनः कामरूपिणः ।
दैत्यदानवसङ्काशा युद्धे देवपराक्रमाः ॥३॥

एषां कोटिसहस्राणि नव पञ्चच सप्त च ।
तथा शङ्खसहस्राणि तथा वृन्दशतानि च ॥४॥

एते सुग्रीवसचिवाः किष्किन्धानिलयाः सदा ।
हरयो देवगन्धर्वैरुत्पन्नाः कामरूपिणः ॥५॥

यौ तौ पश्यसि तिष्ठन्तौ कुमारौ देवरूपिणौ ।
मैन्दश्च द्विविदश्चोभौ ताभ्यां नास्ति समो युधि ॥६॥

ब्रह्मणा समनुज्ञातावमृतप्राशिनावुभौ ।
आशंसेते युधा लङ्कामेतौ मर्दितुमोजसा ॥७॥

यावेतावेतयोः पार्श्वे स्थितौ पर्वतसंनिभौ ।
सुमुखो विमुखश्चैव मृत्युपुत्रौ पितुः समौ ॥८॥

यं तु पश्यसि तिष्ठन्तं प्रभिन्नमिव कुञ्जरम् ।
यो बलात्क्षोभयेत्क्रुद्धः समुद्रमपि वानरः ॥९॥

एषोऽभिगन्ता लङ्काया वैदेह्यास्तव च प्रभो ।
एनं पश्य पुरा दृष्टं वानरं पुनरागतम् ॥१०॥

ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः ।
हनूमानिति विख्यातो लङ्घितो येन सागरः ॥११॥

कामरूपी हरिश्रेष्ठो बलरूपसमन्वितः ।
अनिवार्यगतिश्चैव यथा सततगः प्रभुः ॥१२॥

उद्यन्तं भास्करं दृष्ट्वा बालः किल पिपासितः ।
त्रियोजनसहस्रं तु अध्वानमवतीर्य हि ॥१३॥

आदित्यमाहरिष्यामि न मे क्षुत्प्रतियास्यति ।
इति सञ्चिन्त्य मनसा पुरैष बलदर्पितः ॥१४॥

अनाधृष्यतमं देवमपि देवर्षिदानवैः ।
अनासाद्यैव पतितो भास्करोदयने गिरौ ॥१५॥

पतितस्य कपेरस्य हनुरेका शिलातले ।
किं चिद्भिन्ना दृढहनोर्हनूमानेष तेन वै ॥१६॥

सत्यमागमयोगेन ममैष विदितो हरिः ।
नास्य शक्यं बलं रूपं प्रभावो वानुभाषितुम् ॥१७॥

एष आशंसते लङ्कामेको मर्दितुमोजसा ।
यश्चैषोऽनन्तरः शूरः श्यामः पद्मनिभेक्षणः ॥१८॥

इक्ष्वाकूणामतिरथो लोके विख्यात पौरुषः ।
यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते ॥१९॥

यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ।
यो भिन्द्याद्गगनं बाणैः पर्वतांश्चापि दारयेत् ॥२०॥

यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः ।
स एष रामस्त्वां योद्धुं राजन्समभिवर्तते ॥२१॥

यश्चैष दक्षिणे पार्श्वे शुद्धजाम्बूनदप्रभः ।
विशालवक्षास्ताम्राक्षो नीलकुञ्चितमूर्धजः ॥२२॥

एषोऽस्य लक्ष्मणो नाम भ्राता प्राणसमः प्रियः ।
नये युद्धे च कुशलः सर्वशास्त्रविशारदः ॥२३॥

अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली ।
रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥२४॥

न ह्येष राघवस्यार्थे जीवितं परिरक्षति ।
एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान् ॥२५॥

यस्तु सव्यमसौ पक्षं रामस्याश्रित्य तिष्ठति ।

रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः ॥ २६ ॥

श्रीमता राजराजेन लङ्कायामभिषेचितः ।
त्वामेव प्रतिसंरब्धो युद्धायैषोऽभिवर्तते ॥ २७ ॥

यं तु पश्यसि तिष्ठन्तं मध्ये गिरिमिवाचलम् ।
सर्वशाखामृगेन्द्राणां भर्तारमपराजितम् ॥ २८ ॥

तेजसा यशसा बुद्ध्या ज्ञानेनाभिजनेन च ।
यः कपीनति बभ्राज हिमवानिव पर्वतान् ॥ २९ ॥

किष्किन्धां यः समध्यास्ते गुहां सगहनद्रुमाम् ।
दुर्गां पर्वतदुर्गस्थां प्रधानैः सह यूथपैः ॥ ३० ॥

यस्यैषा काञ्चनी माला शोभते शतपुष्करा ।
कान्ता देवमनुष्याणां यस्यां लक्ष्मीः प्रतिष्ठिता ॥ ३१ ॥

एतां च मालां तारां च कपिराज्यं च शाश्वतम् ।
सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः ॥ ३२ ॥

एवं कोटिसहस्रेण शङ्कूनां च शतेन च ।
सुग्रीवो वानरेन्द्रस्त्वां युद्धार्थमभिवर्तते ॥ ३३ ॥

इमां महाराजसमीक्ष्य वाहिनीम्
उपस्थितां प्रज्वलितग्रहोपमाम् ।
ततः प्रयत्नः परमो विधीयतां
यथा जयः स्यान्न परैः पराजयः ॥ ३४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com